हरित्, पुं, (हरति नयनमनांसीति । हृ + "द्रुहहृहियुदिभ्य इतिः।" उणा० १ । ९८ । इति इतिः।) नीलपीतमिश्रितवर्णः। सवुजरङ् इति भाषा ॥ तत्पर्य्यायः। पालाशः २ हरितः ३ । इत्यमरः । १ । ५ । १४ ॥ श्यामः ४ । इति शब्दरत्नावली ॥ अश्वविशेषः। इति मेदिनी ॥ सूर्य्याश्वः। इति त्रिकाण्डशेषः ॥ यथा, कुमारे । २ । ४३ ।

"उत्पाट्य मेरुशृङ्गाणि क्षुण्णानि हरितां खुरैः । आक्रीड़पर्व्वतास्तेन कल्पिताः स्वेषु वेश्मसु ॥") सुद्गः। इति हेमचन्द्रः ॥ सिंहः । सूर्य्यः । विष्णुः । इति केचित् ॥ हरिद्वर्णविशिष्टे, त्रि ॥

हरित्, स्त्री, (हृ + इतिः।) दिक् । इत्यमरः।१।३।१॥ (यथा, रघुः । ३ । ३० ।

"ततार विद्याः पवनातिपातिभि-
र्दिशो हरिद्भिर्हरितामिवेश्वरः ॥")

हरिद्रा । इति राजनिर्घण्टः ॥

हरित्, पुं, क्ली, (हृ + इतिः।) तृणम् । इति मेदिनी ॥

हरितं, क्ली, (हृ + इतन् ।) स्थौणेयकम् । इति राजनिर्घण्टः ॥

हरितः, पुं, (हरति नयनमनांसीति । हृ + "हृश्याभ्यामितन् ।" उणा० ३ । ९३ । इति इतन् ।) हरिद्वर्णः । इत्यमरः । १ । ५ । १४ ॥ सिंहः । इति केचित् ॥ मन्थानकतृणम् । इति राजनिर्घण्टः ॥ हारील इति लोके । तदर्थे पर्य्यायो यथा,—

"हारीतो रक्तपित्तः स्याद्धरितोऽपि स कथ्यते ॥" इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे ॥) हरिद्वर्णयुक्ते, त्रि । इति मेदिनी ॥ (यथा, किराते । ५ । ३८ ।

"परिसरविषयेषु लीढ़मुक्ता
हरिततृणोद्गमशङ्कया मृगीभिः ॥")

हरितकं, क्ली, (हरितो वर्णोऽस्त्यस्येति । अच् । ततः कन् ।) शाकम् । इत्यमरः । २ । ९ । ३४ ॥ (यथा, माघे । ५ । ५८ ।

"अग्रावि भूमिपतिभिः क्षणवीतनिद्रै-
रश्वन् पुरो हरितकं मुदमादधानः ॥")

हरितपत्रिका, स्त्री, (हरितानि पत्राणि यस्याः । ततः स्वार्थे कन् । टापि अत इत्वम् ।) पाची । इति राजनिर्घण्टः ॥

हरितशाकः, पुं, (हरितः हरिद्वर्णः शाकः ।) शिग्रुः । इति राजनिर्घण्टः ॥ (शिग्रुशब्देऽस्य गुणादयो ज्ञातव्याः ॥)

हरिता, स्त्री, (हरितो वर्णोऽस्त्यस्या इति । अच् । टाप् ।) दूर्व्वा । इति मेदिनी ॥ जयन्ती । हरिद्रा । कपिलद्राक्षा । पाची । नीलदूर्व्वा । इति राजनिर्घण्टः ॥

हरितालं, क्ली, (हरितं तद्वर्णं आलातीति । आ + ला + कः ।) पीतवर्णधातुविशेषः । स तु हरेर्व्वीर्य्यम् । यथा,—

"हरितालं हरेर्व्वीर्य्यं लक्ष्मीवीर्य्यं मनःशिला । पारदं शिववीर्य्यं स्यात् गन्धकं पार्व्वतीरजः ॥"
इति वैद्यकम् ॥

तत्पर्य्यायः । पिञ्जरम् २ पीतकम् ३ तालम् ४ आलम् ५ हरितालकम् ६ । इत्यमरः ।२।९।१०३॥ गोदन्तम् ७ पीतलम् ८ नटमण्डनम् ९ हरिबीजम् १० विश्रधातुः ११ । इति जटाधरः ॥ वर्णकम् १२ नटभूषणम् १३ । इति रत्नमाला ॥ पीतम् १४ गोरोचम् १५ चित्राङ्गम् १५ पिञ्जरकम् १७ वैदलम् १८ तालकम् १९ कनकरसः २० काञ्चनकम् २१ विड़ालकम् २२ चित्रगन्धम् २३ पिङ्गम् २४ पिङ्गसारम् २५ गौरीललितम् २६ । अस्य गुणाः । कटुत्वम् । उष्णत्वम् । स्निग्धत्वम् । त्वग्दोषभूतभीतिविषयवातरुजानाशित्वञ्च । इति राजनिर्घण्टः ॥ * ॥ अपि च ।

"हरितालं द्विधा प्रोक्तं पत्राख्यं पिण्डसंज्ञकम् ।
तयोराद्यं गुणैः श्रेष्ठं ततो हीनगुणं परम् ॥
स्वर्णवर्णं गुरु स्निग्धं सपत्रं चाभ्रपत्रवत् ।
पत्राख्यं तालकं विद्यात् गुणाढ्यं तद्रसायनम् ॥
निष्पत्रं पिण्डसदृशं स्वल्पसत्त्वं तथा गुरु ।
स्त्रीपुष्पहारकं स्वल्पगुणं तत्पिण्डतालकम् ॥
हरितालं कटु स्निग्धं कषायोष्णं हरेद्विषम् ।
कण्डुकुष्ठास्यरोगास्रकफपित्तकचव्रणान् ॥
हरति च हरितालं चारुतां देहजातां
सृजति च बहुतापानङ्गसङ्कोचपीड़ाः ।
वितरति कफवातौ कुष्ठरोगं विदध्या-
दिदमसितमशुद्धं मारितं चाप्यसम्यक् ॥"
इति भावप्रकाशः ॥ * ॥

अथ तालस्याशुद्धस्य दोषमाह ।

"अशुद्धं तालमायुर्घ्नं कफमारुतमेहकृत् ।
तापस्फोटाङ्गसंकोचान् कुरुते तेन शोधयेत् ॥"

अथ तालकस्य शोधनविधिः ।

"तालकं कणशः कृत्वा तच्चूर्णं काञ्जिके क्षिपेत् ।
दोलायन्त्रेण यामैकं ततः कुष्माण्डजे द्रवे ॥
तिलतैले पचेद्यामं यामञ्च त्रिफलारसे ।
दोलायन्त्रे चतुर्यामं पक्वं शुध्यति तालकम् ॥" * ॥

अथ तालकस्य मारणविधिः ।

"सदलं तालकं शुद्धं पौनर्नवरसेन तु ।
खल्ले विमर्द्दयेदेकं दिनं पश्चाद्विशोषयेत् ॥
संशोध्य गोलकं तस्य कुर्य्यात्तच्च विशोषयेत् ।
ततः पुनर्नवाक्षारैः स्थाल्यामर्द्धं प्रपूरयेत् ॥
तत्र तद्गोलकं धृत्वा पुनस्तेनैव पूरयेत् ।
आकण्ठं पिठरं तस्य पिधानं धारयेन्मुखे ॥
स्थालीं चूल्ल्यां समारोप्य क्रमाद्वह्निं विवर्द्धयेत् ।
दिनान्यन्तरशून्यानि पञ्चवह्निं प्रदीपयेत् ॥
एवं तन्म्रियते तालं मात्रा तस्यैकरक्तिका ।
अनुपानान्यनेकानि यथायोग्यं प्रयोजयेत् ॥"

एवं शोधितस्य मारितस्य तालकस्य गुणाः ।

"हरितालं कटु स्निग्धं कषायोष्णं हरेद्विषम् ।
कण्डुकुष्ठास्यरोगास्रकफपित्तकचव्रणान् ॥"

अन्यच्च ।

"तालकं हरते रोगान् कुष्ठमृत्युज्वरापहम् ।
शोधितं कुरुते कान्तिं वीर्य्यवृद्धिं तथायुषः ॥"
इति च भावप्रकाशः ॥

हरितालः, पुं, पीतवर्णपक्षिविशेषः । हरियाल इति भाषा । तस्य मांसगुणाः ।

"हरितालोऽल्पविट्कः स्यात् कषायो मधुरो लघुः ।
रक्तपित्तप्रशमनस्तृषाघ्नो वातकोपनः ॥"
इति राजवल्लभः ॥

हरितालकं, क्ली, (हरितालमेव । स्वार्थे कन् ।) हरितालम् । इत्यमरः । २ । ९ । १०३ ॥

हरितालिका, स्त्री, दूर्व्वा । इति त्रिकाण्डशेषः ॥ सौरभाद्रशुक्लचतुर्थी हरितालिका । सौरभाद्रकृष्णचतुर्थ्यामुदितचन्द्रस्य नष्टचन्द्र इति संज्ञा । इति पञ्जिकायां प्रसिद्धा । तत्र चन्द्रदर्शननिषेधो यथा । भोजदेवः ।

"शुक्लपक्षे चतुर्थ्यान्तु सिंहे चन्द्रस्य दर्शनम् ।
मिथ्याभिशापं कुरुते न पश्येत्तत्र तन्ततः ॥"

चतुर्थ्यां दर्शननिषेधात् तत्रोदितस्य चन्द्रस्य पञ्चम्यां दर्शने तु न दोषः । अतः ।

"पञ्चाननगते भानौ पक्षयोरुभयोरपि ।
चतुर्थ्यामुदितश्चन्द्रो नेक्षितव्यः कदाचन ॥"

चतुर्थ्यां नेक्षितव्य इति मुनिभिरुदित उक्त इत्यर्थः । अथवा चतुर्थ्यामित्यस्य प्रधानक्रियान्वयाभ्यर्हितत्वादीक्षितव्य इत्यनेनान्वयो न तूदित इत्यनेन । तथा च अव्ययं प्रधानगामि इति सूत्रे अव्ययस्य शब्दस्य प्रधानेन सह सम्बन्ध इति भट्टनारायणव्याख्यानं इति । उदितस्त्वर्द्धोदितव्यावृत्तिपरः स्वरूपाख्यानपरो वा ।

"ब्राह्मणी तु शुना दष्टा जम्बुकोष्ट्रेण वा गवा ।
उदितं सोमनक्षत्रं दृष्ट्वा सद्यः शुचिर्भवेत् ॥"
इति पराशरोक्तोदित इतिवत् ॥ * ॥

नन्वेकपदस्य कथमनेकार्थता इति चेन्न यावन्तोऽर्थास्तावन्ति पदानीति । तथा चोक्तम् ।

"यावतामेव धातूनां लिङ्गं रूढ़िगतं भवेत् ।
अर्थश्चैवाभिधेयस्तु तावद्भिर्गुणविग्रहः ॥"

लिङ्गं समार्थम् । रूढ़िगतं प्रसिद्धम् । न त्वप्रसिद्धम् । हन हिंसागत्योरित्यादौ गमनादिकम् । अभिधेयो वाच्यः । तावद्भिर्धातुभिर्गुणविग्रहो गुणैर्गणनाभिर्विग्रहो ग्रहणं यत्रार्थे स तथा । एतेन धातुसमसंख्यार्थत्वं पदस्य । ब्रह्मपुराणे सिंहार्काधिकारे ।

"नारायणोऽभिशप्तस्तु निशाकरमरीचिषु ।
क्षितश्चतुर्थ्यामप्यपि मनुष्याय पतेच्च सः ॥
अतश्चतुर्थ्यां चन्द्रन्तु प्रमादाद्वीक्ष्य मानवः ।
पठेद्धात्रेयिकावाक्यं प्राङ्मुखो नाप्युदङ्मुखः ॥"

अभिशप्तः परीवादविषयीभूतः । सोऽभिशापः । धात्रेयिकावाक्यं विष्णुपुराणे ।

"सिंहः प्रसेनमवधीत् सिंहो जाम्बवता हतः ।
सुकुमारक मा रोदीस्तव ह्येष स्यमन्तकः ॥"

अनेन मन्त्रेणाभिमन्त्रितं जलं पेयं आचारात् स्यमन्तकोपाख्यानञ्च श्रोतव्यम् । इति तिथ्यादितत्त्वम् ॥